श्री ऋषभदेवस्वामिने नमः ।

श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।

श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।

श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ।।

ॐ श्रीँ ह्रीँ अर्हँ नमः ।

आचार्यभगवत्-कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रणीतं

स्वोपज्ञलघुवृत्तिविभूषितं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।।

प्रणम्य[1] परमात्मानं श्रेयः शब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ।।१।।

**अर्हँ ।१।१।१।।**

अर्हँ[2] इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ।।१।।

**सिद्धिः स्याद्वादात् ।१।१।२।।**

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां **सिद्धिः** निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ।।२।।

**लोकात् ।१।१।३।।**

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः **सिद्धिर्ज्ञप्तिर्वेदितव्या** , वर्णसमाम्नायस्य च ।।३।। तत्र-

**औदन्ताः स्वराः ।१।१।४।।**

---

१. १।१।१। त आरभ्य ३।२।१५६। पर्यन्तमस्य संशोधने लघुवृत्तेरिमे हस्तलिखितादर्शाः सम्प्रयुक्ताः — पा१,२,३, खं१,२,३, J3 । एषां सर्वेषां स्वरूपं प्रस्तावनातोऽवगन्तव्यम् ।। २. **अर्हमित्ये**° खं१, पा१,J3 ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥४॥

**एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ।१।१।५॥**

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ , आ ई ऊ ॠ ॡ , ए ऐ ओ औ , आ ३ ई ३ ऊ ३ इत्यादि ॥५॥

**अनवर्णा नामी ।१।१।६॥**

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

**ॡदन्ताः समानाः ।१।१।७॥**

ॡकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

**ए-ऐ-ओ-औ सन्ध्यक्षरम् ।१।१।८॥**

' ए ऐ ओ औ ' इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

**अं-अः अनुस्वार-विसर्गौ ।१।१।९॥**

अकारावुच्चारणार्थौ । ' अं ' इति नासिक्यो वर्णः ' अः ' इति च कण्ठ्यः यथासंख्यम् ' अनुस्वार-विसर्गौ ' स्याताम् ॥९॥

**कादिर्व्यञ्जनम् ।१।१।१०॥**

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न , प फ ब भ म , य र ल व , श ष स ह ॥१०॥

**अपञ्चमान्तस्थो धुट् ।१।१।११॥**

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ , च छ ज झ , ट ठ ड ढ , त थ द ध , प फ ब भ , श ष स ह ॥११॥

**पञ्चको वर्गः ।१।१।१२॥**

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्गः स स वर्गः स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न . प फ ब

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ म ॥१२॥

**आद्य-द्वितीय-श-ष-सा अघोषाः ।१।१।१३॥**

वर्गाणामाद्य-द्वितीया वर्णाः श-ष-साश्च अघोषाः स्युः । क ख , च छ , ट ठ , त थ , प फ , श ष स ॥१३॥

**अन्यो घोषवान् ।१।१।१४॥**

अघोषेभ्योऽन्यः कादिर्वर्णो घोषवान् स्यात् । ग घ ङ , ज झ ञ , ड ढ ण , द ध न , ब भ म , य र ल व , ह ॥१४॥

**य-र-ल-वा अन्तस्थाः ।१।१।१५॥**

एते ' अन्तस्थाः ' स्युः ॥१५॥

**अं-अः-ᳵक-ᳶप-श-ष-साः शिट् ।१।१।१६॥**

अ-क-पा उच्चारणार्थाः , अनुस्वार-विसर्गौ वज्र-गजकुम्भाऽऽकृती च वर्णौ श-ष-साश्च शिटः स्युः ॥१६॥

**तुल्यस्थाना-ऽऽस्यप्रयत्नः स्वः ।१।१।१७॥**

स्थानं[1] कण्ठादि । आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः । **तुल्यौ** वर्णान्तरेण सदृशौ स्थाना-ऽऽस्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वः स्यात् ।

तत्र त्रयोऽकारा उदात्ता-ऽनुदात्त-स्वरिताः प्रत्येकं सानुनासिक-निरनुनासिक-भेदात् षट् , एवं दीर्घ-प्लुतौ इति अष्टादश भेदा अवर्णस्य , ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः । एवम् इवर्णास्तावन्तस्तालव्या विवृतकरणाः स्वाः । उवर्णा ओष्ठ्या विवृतकरणाः स्वाः । ऋवर्णा मूर्द्धन्या विवृतकरणाः स्वाः । लृवर्णा दन्त्या विवृतकरणाः स्वाः । सन्ध्यक्षराणां ह्रस्वा न सन्ति , इति तानि प्रत्येकं द्वादशभेदानि । तत्र एकारास्तालव्या विवृततराः स्वाः । ऐकारास्तालव्या अतिविवृततराः स्वाः । ओकारा ओष्ठ्या विवृततराः स्वाः । औकारा ओष्ठ्या अतिविवृततराः स्वाः । वर्ग्याः पञ्च पञ्च परस्परं स्वाः । य-ल-वाना-मनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥१७॥

---

१. ''स्थानं कण्ठादि । यदाहुः — ''अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥'' [पाणिनीयशिक्षा , श्लो० ८] इति बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# विषयानुक्रमः ।


| विषयः | पत्राङ्कः | विषयः | पत्राङ्कः |
|---|---|---|---|
| प्रथमोऽध्यायः | १-३५ | ३ धातूनामकारादिक्रमः | ५५८-५९८ |
| द्वितीयोऽध्यायः | ३६-१०० | ४ सौत्रादिधातूनां संग्राहकाः श्लोकाः | ५९९-६०० |
| तृतीयोऽध्यायः | १०१-१७३ | ५ अनुबन्धफलम् | ६०१-६०८ |
| चतुर्थोऽध्यायः | १७४-२३३ | ६ अन्तर्गणफलम् | ६०९-६१२ |
| पञ्चमोऽध्यायः | २३४-२९६ | ७ अनिट्कारिकाः | ६१३-६२३ |
| षष्ठोऽध्यायः | २९७-३७२ | ८ द्विकर्मका धातवः | ६२४-६२५ |
| सप्तमोऽध्यायः | ३७३-४४९ | ९ अनुस्वारमूलस्वरूपादिनिरूपणम् | ६२६ |
| १ सूत्राणामकारादिक्रमः | ४५०-५१८ | | |
| २ (१) धातुपाठः | ५१९-५५२ | | |
| (२) कण्ड्वादयो धातवः | ५५२-५५७ | | |


# शुद्धिपत्रकम् ।

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४२ | १७ | आद्वेरः | आ द्वेरः |
| ४२ | २१ | आद्वेस्त्यदां | आ द्वेस्त्यदां |
| ६२ | ७ | तद् भद्रा | तद्-भद्रा |
| ६९ | ७ | षष्ठ्यचौ | षष्ठ्ययौ |
| ६९ | २० | ङ्त्यम् | ङ्यम् |
| ९१ | १२ | कवर | कबर |
| ९९ | ९ | ङ्च्यादीदूतां च | ङ्चा आदीदूतां च |
| १६७ | १५ | °तन्यां अङ् | °तन्याम् अङ् |
| १९३ | १५ | क्ङिति किम् | क्ङितीति किम् |
| १९६ | ८ | रदन्तात् | रदान्तात् |
| १९६ | १४ | तोख्याध्यः | तोऽख्याध्यः |
| २०६ | १ | भावाऽरम्भ | भावा-ऽऽरम्भ |
| २२३ | १५ | प्रकमितुम् | प्रक्रमितुम् |
| २६८ | २४ | समाह्वयौ | समाह्वया-ऽऽह्वयौ |
| २८१ | ७ | गन्ताऽस्मि | गन्तास्मि |
| ३०० | २० | °ब्रभ्रो | °बभ्रो |
| ३०० | २२ | ब्राभव्यः | बाभ्रव्यः |
| ३२२ | १८ | °ङ्यण् | °ङ्यण् ।६।२।१०७।। |
| ४३७ | २१ | मद्रिमा | म्रदिमा |
| ४४७ | ४ | लं एनच | लम् एनच |

अपरं शुद्धिपत्रकं ४४९ तमे पत्रे द्रष्टव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org